# सत्कर्म एव पुण्यम।

**अवबोधनम्।**

**अ. एकवाक्येन उत्तरत।**

*१. यात्री **कुत्र** निवसति स्म?

**उत्तर:** यात्री **गोन्दियानगरे** निवसति स्म।

२. काशीनगरविषये तेन **किं** श्रुतमासीत्?

**उत्तर:** **काशी मोक्षदायिनी नगरी इति** काशीनगरविषये तेन श्रुतमासीत्।

३. अन्येद्युः सः गङ्गानदीं **किं** पृष्टवान्?

**उत्तर:** अन्येद्युः सः गङ्गानदीं पृष्टवान्, **"हे गङ्गादेवि, अहर्निशं जनानां पापक्षालनं करोषि। तेन भवत्याः जलं निश्चितं पापमयं वर्तते। तर्हि भवती अस्य पापमयजलस्य किं करोति?" इति।**

४. नदीजले **केन** पापं सङ्कलितं स्यादिति यात्री चिन्तितवान्?

**उत्तर:** **जनानां पापक्षालनेन** नदीजले पापं सङ्कलितं स्यादिति यात्री चिन्तितवान्।

५. गोन्दिया-निवासी यात्री **कुत्र** जगाम?

**उत्तर:** गोन्दिया-निवासी यात्री **काशीनगरं** जगाम।

६. गङ्गादेवी अहर्निशं **केषां** पापक्षालनं करोति?

**उत्तर:** गङ्गादेवी अहर्निशं **जनानां** पापक्षालनं करोति।

७. नद्याः जलं निश्चितं **कथं** वर्तते?

**उत्तर:** नद्याः जलं निश्चितं **पापमयं** वर्तते।

**ब. योग्य पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

१. _______ मोक्षदायिनी नगरी इति _______ श्रुतमासीत्।
(मुम्बई / काशी) (अनेन / अस्य)

**उत्तर:** **काशी** मोक्षदायिनी नगरी इति **अनेन** श्रुतमासीत्।

२. गङ्गाजले ______ सति सत्यं स पापमुक्तो ______ वा न वा? (निमग्न: / निमग्ने) (भवन्ति / भवति)

**उत्तर:** गङ्गाजले **निमग्ने** सति सत्यं स पापमुक्तो **भवति** वा न वा?

३. स: गङ्गातीरं ______ गङ्गानदीं ______ ।

(गत्वा / गन्तुम्) (पृष्ट: / पृष्टवान्)

**उत्तर:** स: गङ्गातीरं **गत्वा** गङ्गानदीं **पृष्टवान्**।

४. तेन भवत्या: ______ निश्चितं पापमयं ______ ।

(सागर: / जलं) (वर्तते / वर्तन्ते)

**उत्तर:** तेन भवत्या: **जलं** निश्चितं पापमयं **वर्तते**।

५. तर्हि भवती ______ पापमयजलस्य किं ______ ?

(अनेन / अस्य) (पिबति / करोति)

**उत्तर:** तर्हि भवती **अस्य** पापमयजलस्य किं **करोति**?

**क. क: कं वदति तद् लिखत।**

१. अहर्निशं जनानां पापक्षालनं करोषि।

**उत्तर: यात्री गङ्गानदीं वदति।**

२. तेन भवत्या: जलं निश्चितं पापमयं वर्तते।

**उत्तर: यात्री गङ्गानदीं वदति।**

३. भवती अस्य पापमयजलस्य किं करोति?

**उत्तर: यात्री गङ्गानदीं वदति।**

ड. **सत्यं वा असत्यं वा तद् लिखत।**

१. कश्चन काशी-निवासी यात्री एकदा गोन्दियानगरं जगाम।

**उत्तर: असत्यम्।**

२. काशी मोक्षदायिनी नगरी इत्यनेन श्रुतमासीत्।

**उत्तर: सत्यम्।**

३. काशीं प्राप्य उद्याने अटन् स: चिन्तितवान्।

**उत्तर: असत्यम्।**

४. जनानां पापक्षालनेन नदीजले कियत् पुण्यं सङ्कलितं स्यादिति स: चिन्तितवान्।

**उत्तर: असत्यम्।**

५. स: गङ्गातीरं गत्वा देवं पृष्टवान्।

**उत्तर: असत्यम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. गङ्गाया: मलिनता विषये भवत: मतं माध्यमभाषया लिखत।

उत्तर: 'सत्कर्म एव पुण्यम्।' या पाठात आपण आयुष्यभर जी सत्कर्मे करणे आवश्यक आहे, अशा सत्कर्मांचे महत्त्व सांगितले आहे. पवित्र जागी नदी किंवा समुद्रात स्नान केल्याने आपले पाप धुतले जाते अशी आपली श्रद्धा असते. या पाठात या श्रद्धेविषयी स्पष्टीकरण देण्यात आले आहे.

भारतीय संस्कृतीमध्ये गंगेशी निगडित अशा अनेक श्रद्धा आहेत. गंगा ही स्वर्गातून अवतरली आहे, अशी धारणा आहे आणि म्हणूनच तिला देवता मानून तिची पूजा केली जाते. अशी एक समजूत आहे, की गंगेमध्ये स्नान केल्यामुळे आपली पापे धुतली जातात. परंतु, यामुळे रोज अनेक लोक गंगा नदीवर स्नानासाठी जातात. देवाला वाहिलेली फुले व हार लोक गंगा नदीमध्ये फेकतात. यामुळे गंगा नदी प्रदूषित होत आहे. कुजलेली फुले, फळे तसेच आंघोळीमुळे साबण व इतर घाण पाण्यात मिसळून पाणी प्रदूषित होते. आजकाल असे आढळून आले आहे, की या प्रथांमुळे पाण्याचा मोठा स्रोत असलेली गंगा नदी प्रदूषित होत आहे. गंगेचे प्रदूषण होण्यामागे हे एक मोठे कारण आहे. या सगळ्यामुळे पूरपरिस्थितीही निर्माण होते. म्हणूनच आपण अशा समस्यांचे निराकरण केले पाहिजे.

खरे पाहता, केवळ गंगास्नान करण्यापेक्षा आपण पापाचे मूळ असणाऱ्या अभिलाषा नष्ट केल्या पाहिजेत. आपल्या पर्यावरणाची आपण काळजी घेतली पाहिजे आणि त्याची हानी रोखली पाहिजे.

## पृथक्करण।

१. घटनाक्रमानुसारं वाक्यानि संयोजयत।

यात्री

i. अन्येद्युः गङ्गातीरं गतवान्।
ii. गङ्गातीरे अटन् चिन्तितवान्।
iii. काशीनगरं जगाम।
iv. गङ्गानदीं प्रश्नान् पृष्टवान्।

उत्तर:

**यात्री**

**i. काशीनगरं जगाम।**
**ii. गङ्गातीरे अटन् चिन्तितवान्।**
**iii. अन्येद्युः गङ्गातीरं गतवान्।**
**iv. गङ्गानदीं प्रश्नान् पृष्टवान् ।**

## शब्दज्ञानम्।

**अ. गद्यांशे समानार्थपदं चिनुत।**

| | | | |
|---|---|---|---|
| *१. | गङ्गाकूले , गङ्गातटे | = | **गङ्गातीरे।** |
| *२. | मानवः, मनुष्यः, मनुजः | = | **नरः।** |
| *३. | लोकाः | = | **जनाः।** |
| *४. | अपरेद्युः (दुसऱ्या दिवशी) | = | **अन्येद्युः।** |
| *५. | दिवारात्रम् , अहोरात्रम् | = | **अहर्निशम्।** |
| *६. | वारि, नीरम् , तोयम् , अम्बु | = | **जलम्।** |
| ७. | पुरी, पत्तनम् | = | **नगरी।** |
| ८. | मन्दाकिनी, भागीरथी, जाह्नवी | = | **गङ्गा।** |

**ब. गद्यांशे विलोमपदं चिनुत।**

| | | | |
|---|---|---|---|
| *१. | पुण्यमयम् | × | **पापमयम्।** |
| *२. | असत्यम् | × | **सत्यम्।** |
| ३. | आजगाम | × | **जगाम।** |
| ४. | पुण्यम् | × | **पापम्।** |
| ५. | निःशङ्कमनाः | × | **साशङ्कमनाः।** |
| ६. | आगत्य, आगम्य | × | **गत्वा।** |

**क. चतुर्थपदं लिखत।**

१. नि + मस्ज् : निमज्य : : प्र + आप् : _______

**उत्तर:** नि + मस्ज् : निमज्य : : प्र + आप् : **प्राप्य**

२. चिन्त् : चिन्तितवान् : : प्रच्छ्-पृच्छ् : _______

**उत्तर:** चिन्त् : चिन्तितवान् : : प्रच्छ्-पृच्छ् : **पृष्टवान्**

३. गङ्गातीर : गङ्गातीरे : : गङ्गाजल : _______

**उत्तर:** गङ्गातीर : गङ्गातीरे : : गङ्गाजल : **गङ्गाजले**

४. भू-भव् : भवति : : कृ : _______

**उत्तर:** भू-भव् : भवति : : कृ : **करोति**

५. काशी : काशीम् : : गङ्गानदी : _______

**उत्तर:** काशी : काशीम् : : गङ्गानदी : **गङ्गानदीम्**

## ड. भिन्नार्थकशब्दानां ज्ञानम्।

१. **'तीर:'इति शब्दस्य अर्थः तटः (किनारा, काठ) तथा बाणः (बाण) च।**

स: गङ्गातीरं गत्वा गङ्गानदीं पृष्टवान्। इति वाक्ये 'गङ्गातीरम्' इति शब्दस्य अर्थ: – गङ्गाया: ________।


(बाण: / तट:)

**उत्तर:** स: गङ्गातीरं गत्वा गङ्गानदीं पृष्टवान्। इति वाक्ये 'गङ्गातीरम्' इति शब्दस्य अर्थ: – गङ्गाया: **तट:**।

## इ. विशेषण-विशेष्य-अन्विति:।

१. अधोदत्तान् शब्दान् योग्यस्तम्भे लिखित्वा जालरेखाचित्रं पूरयत।

पापमयम् , यात्री, नगरी , पापमुक्तम् , मोक्षदायिनी, जलम् , आत्मानम् , गोन्दिया-निवासी



उत्तर: १. पापमयम् जलम्।


२. पापमुक्तम् आत्मानम्।

३. मोक्षदायिनी नगरी।

४. गोन्दिया-निवासी यात्री।

**फ. धातुसाधित-अव्ययानां चयनम् (त्वान्त / ल्यबन्त / तुमन्त) / विभक्त्यन्तपदानां चयनम्।**

१. गद्यांशे पूर्वकालवाचक-अव्ययानि चित्वा उचितस्तम्भे लिखत।




उत्तर: १. गत्वा।

२. प्राप्य।

३. निमज्य।

२. गद्यांशे तृतीया-विभक्त्यन्तपदानि चित्वा लिखत।

**उत्तर: i. अनेन।**

**ii. तेन।**

**iii. पापक्षालनेन।**

**ग. समूहेतरपदं चिनुत।**

१. अनेन, स:, अस्मिन् , अस्य

**उत्तर: स:।**

२. करोषि, करोति, जगाम

**उत्तर: जगाम।**

३. श्रुतम् , चिन्तितवान् , पृष्टवान्

**उत्तर: श्रुतम्।**

४. भवति, वर्तते, करोति, स्यात्

**उत्तर: स्यात्।**

५. जलम् , यत् , कियत् , तर्हि

**उत्तर: जलम्।**

**अवबोधनम्।**

**अ. एकवाक्येन उत्तरत।**

*१. नदीजलस्य **किं** भवति?

उत्तरः **नदी सागरं मिलित्वा पापमयं जलं तस्मिन् उत्सृजति।**

२. सागरजलस्य **किं** भवति?

उत्तरः **सूर्यकिरणैः** सागरजलस्य **बाष्पं** भवति।

३. **काः** स्वजलस्थितं पापं सागरे निक्षिपन्ति?

उत्तरः **नद्यः** स्वजलस्थितं पापं सागरे निक्षिपन्ति।

४. **कैः** पापजलस्य बाष्पं भवति?

उत्तरः **सूर्यकिरणैः** पापजलस्य बाष्पं भवति।

**ब. रिक्तं स्थानं पूरयत।**

१. यदा ________ सागरं मिलामि तदा ________ तस्मिन्नेव उत्सृजामि।

(अहम् / त्वम्) (वालुकां / जलं)

उत्तरः यदा **अहं** सागरं मिलामि तदा **जलं** तस्मिन्नेव उत्सृजामि।

२. ________ ________ गतवान्।

(गङ्गा / यात्री) (सागरतीरे / सागरतीरम्)

उत्तरः **यात्री सागरतीरं** गतवान्।

३. ________ स्वजलस्थितं पापं ________ निक्षिपन्ति।

(नद्यौ / नद्य:) (त्वयि / घटे)

उत्तर: **नद्य:** स्वजलस्थितं पापं **त्वयि** निक्षिपन्ति।

४. त्वं ________ ________ न वेति।

(पापाकर: / सुखाकर:) (भवति /भवसि)

उत्तर: त्वं **पापाकर: भवसि** न वेति।

५. ________ तस्य ________ बाष्पं भवति।

(चन्द्रकिरणै: / सूर्यकिरणै:) (जलात् / जलस्य)

उत्तर: **सूर्यकिरणै:** तस्य **जलस्य** बाष्पं भवति।

**क. क: कं वदति? इति लिखत।**

१. यदाऽहं सागरं मिलामि तदा सर्वमेतत्पापमयं जलं तस्मिन्नेव उत्सृजामि।

उत्तर: **नदी यात्रिनं वदति।**

२. सर्वा: नद्य: स्वजलस्थितं पापं त्वयि निक्षिपन्ति।

उत्तर: **यात्री सागरं वदति।**

३. त्वं पापाकर: वा पापधिरेव भवसि न वेति।

उत्तर: **यात्री सागरं वदति।**

४. यदा नद्य: पापमानयन्ति तदहं गृह्णामि।

उत्तर: **सागर: यात्रिनं वदति।**

५. बाष्पीभूतस्य पापजलस्य तदनन्तरं किं भवतीति न जाने।

**उत्तरः सागरः यात्रिनं वदति।**

## ड. सत्यं वा असत्यं वा इति लिखत।

१. नदी सागरं मिलित्वा सर्वं जलं तस्मिन्नेव उत्सृजति।

**उत्तरः सत्यम्।**

२. सागर उक्तवान् , यदा नद्यः पापमानयन्ति तदहं न गृह्णामि।

**उत्तरः असत्यम्।**

३. सूर्यकिरणैः सागरजलस्य बाष्पं भवति।

**उत्तरः सत्यम्।**

४. बाष्पीभूतस्य पापजलस्य अनन्तरं किं भवति इति सागरः जानाति।

**उत्तरः असत्यम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. पापजलस्य किं भवति तत् जलचक्रस्य आधारेण स्पष्टीकुरुत।

**उत्तरः** 'सत्कर्म एव पुण्यम्।' या पाठात आयुष्यातील सत्कर्मांचे महत्त्व विशद केले आहे. पवित्र स्थानावर नदीत किंवा समुद्रात स्नान केल्याने आपले पाप धुतले जाते अशी आपली श्रद्धा आहे. परंतु, खरे तर आपण पापाचे मूळ कारण असणाऱ्या आपल्या अभिलाषा नष्ट केल्या पाहिजेत. आपण सत्कर्मे करण्याचा ठाम निश्चय केला पाहिजे. या पाठात निसर्गातील जलचक्राच्या तत्त्वाचा उपयोग करून आपल्याला हे सुंदर पद्धतीने समजावण्यात आले आहे, की आपल्या वागण्याचे फळ आपल्याला भोगावेच लागते.

या पाठात, गोंदिया येथून आलेला एक प्रवासी गंगाकिनारी फिरत असताना त्याच्या मनात 'पवित्र जागी नदीत स्नान केल्याने पापक्षालन होते' या श्रद्धेविषयी शंका निर्माण झाली. त्यामुळे दुसऱ्या दिवशी त्याने गंगा नदीला, 'तुझे पाणी पापमय झाले असेल' असे विचारले. हा प्रश्न ऐकून गंगेने त्याला उत्तर दिले, की जेव्हा ती समुद्राला जाऊन मिळते, तेव्हा ती ते सगळे पापमय पाणी समुद्रात फेकून देते. समुद्राने पोटात घेतलेल्या त्या पाण्याची सूर्यकिरणांमुळे वाफ होते. या वाफेचा ढग बनतो. सरतेशेवटी हे वाफ बनलेले पाणी पावसाच्या रूपाने जमिनीवर परत येते. जीवनदाता व जलदाता ढग, पाण्यात मिसळलेलं पाप ज्याचं असतं, त्याच्याच घरावर ते पापमय पाणी पावसाच्या रूपाने बरसवतो. अशा प्रकारे ज्याचे ते पाप असते, त्याच्याचकडे ते परत येते. म्हणजेच, आपल्या कर्माची जबाबदारी आपल्याला घ्यावीच लागते.

## पृथक्करणम्।

१. घटनाक्रमानुसारं संयोजयत।

i. सागर: नदीत: पापं गृह्णाति।

ii. नदी पापमयजलं सागरे उत्सृजति।

iii. सूर्यकिरणै: तस्य जलस्य बाष्पं भवति।

iv. नदी सागरं मिलति।

उत्तर: **i. नदी सागरं मिलति।**

**ii. नदी पापमयजलं सागरे उत्सृजति।**

**iii. सागर: नदीत: पापं गृह्णाति।**

**iv. सूर्यकिरणै: तस्य जलस्य बाष्पं भवति।**

## शब्दज्ञानम्।

### अ. गद्यांशे पर्यायवाचिशब्दं चित्वा लिखत।

*१. श्रुत्वा, आकर्ण्य (ऐकून) = **निशम्य।**

*२. समुद्रः, जलधिः, रत्नाकरः, उदधिः, पयोनिधिः = **सागरः।**

३. मन्दाकिनी, जाह्नवी, भागीरथी, सुरसरित् = **गङ्गा।**

४. तोयम्, उदकम्, नीरम्, सलिलम्, अम्बु = **जलम्।**

५. तरङ्गिणी, शैवलिनी, तटिनी, आपगा, सरित् = **नदी।**

६. पापाकरः (पापांचा साठा) = **पापधिः।**

### ब. गद्यांशे विपरितार्थक शब्दं चित्वां लिखत।

*१. त्यजामि × **गृह्णामि।**

२. अनुत्सुकः × **उत्सुकः।**

३. पुण्यम् × **पापम्।**

४. असत्यम् × **सत्यम्।**

५. इदानीम्, अधुना (आता) × **तदनन्तरम्।** (नंतर)

### क. चतुर्थपदं लिखत।

१. गम्-गच्छ् : गतवान् :: प्रच्छ्-पृच्छ् : ______

उत्तरः गम्-गच्छ् : गतवान् :: प्रच्छ्-पृच्छ् : **पृष्टवान्**

२. मिल् : मिलामि :: ग्रह् : ______

उत्तरः मिल् : मिलामि :: ग्रह् : **गृह्णामि**

३. नि + क्षिप् : निक्षिपन्ति :: आ + नी-नय् : ______

उत्तरः नि + क्षिप् : निक्षिपन्ति :: आ + नी-नय् : **आनयन्ति**

४. उत्सुक : अनुत्सुक :: सत्यम् : ______

उत्तरः उत्सुक : अनुत्सुक :: सत्यम् : **असत्यम्**


ड. **विशेषण-विशेष्य-अन्विति:।**

१. स्तम्भमेलनं कुरुत।

| | 'अ' गट | | 'ब' गट |
|---|---|---|---|
| i. | उत्सुक: | अ. | जलस्य |
| ii. | सर्वा: | ब. | जलम् |
| iii. | पापमयम् | क. | नद्य: |
| iv. | बाष्पीभूतस्य | ड. | यात्री |

उत्तर: **i. उत्सुक: यात्री।** **ii. सर्वा: नद्य:।**
**iii. पापमयं जलम्।** **iv. बाष्पीभूतस्य जलस्य।**

२. गद्यांशे आगतानि वर्तमानकाल-क्रियापदानि लिखित्वा जालरेखाचित्रं पूरयत।




उत्तर: १. **मिलामि।** २. **उत्सृजामि।**
३. **भवति।** ४. **जाने।**
५. **निक्षिपन्ति।** ६. **भवसि।**
७. **आनयन्ति।** ८. **गृह्णामि।**

इ. **धातुसाधित-अव्ययानां चयनम् (त्वान्त / ल्यबन्त / तुमन्त) / विभक्त्यन्तपदानां चयनम्।**

१. गद्यांशे पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययं चित्वा लिखत।

उत्तर: **ल्यबन्त-अव्ययम् -**
**i. निशम्य।**

२. गद्यांशे हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।

**उत्तरः तुमन्त-अव्ययम् -**

**i. ज्ञातुम्।**

३. I. गद्यांशे सप्तमी-विभक्त्यन्तपदे चित्वा लिखत।

**उत्तरः i. तस्मिन्।**

**ii. त्वयि।**

II. गद्यांशे तृतीया-विभक्त्यन्तपदे चित्वा लिखत।

**उत्तरः i. तेन।**

**ii. सूर्यकिरणैः।**

**फ. समूहेतरपदं चिनुत।**

१. उक्तवान् , निशम्य, पृष्टवान् , गतवान्

**उत्तरः निशम्य।**

२. गृह्णामि, मिलामि, भवसि, उत्सृजामि

**उत्तरः भवसि।**

३. असौ, तेन, तस्मिन्, तस्य

**उत्तरः असौ।**

४. मन्दाकिनी, गङ्गा, जाह्नवी, सरित्

**उत्तरः सरित् ।**

५. सागरः, उदधिः, तडागः, समुद्रः

**उत्तरः तडागः।**

## अवबोधनम्।

अ. एकवाक्येन उत्तरत।

*१. मेघः **किमुक्तवान्**?

उत्तरः मेघः उक्तवान् , "**पापस्य न किमपि करोमि। अहं तु जीवनदाता। जीवनं स्वकर्माधिष्ठितम्। अतः यस्य यत्पापमस्ति तत्तस्य गृहशिखरे वृष्टिरूपेण पातयामि**" इति।

*२. पुण्यसञ्चयः **कथं** भवति?

उत्तरः **जीवने सदाचारी भूत्वा एव पुण्यसञ्चयः कर्तुं शक्यते।**

३. जीवनं कीदृशम्?

उत्तरः जीवनं **स्वकर्माधिष्ठितम्।**

४. **कः** जीवनदाता?

उत्तरः **मेघः** जीवनदाता।

५. **कं** विना पापान्मुक्तिरशक्या?

उत्तरः **उचितप्रायश्चित्तं** विना पापान्मुक्तिरशक्या।

६. यात्री **किं** विचिन्त्य स्वगृहमगच्छत्?

उत्तरः **'पापाचरणं कृत्वा तस्य भारं न कस्मा अपि दास्ये' इति** विचिन्त्य यात्री स्वगृहमगच्छत्।

७. यात्री **कुत्र** स्थित्वा अवलोकयितुमारब्धवान्?

उत्तरः यात्री **सागरतीरे** स्थित्वा अवलोकंयितुमारब्धवान्।

८. **कस्य** मेघः भवति?

उत्तरः **बाष्पस्य** मेघः भवति।

९. उचितप्रायश्चित्तं विना **कस्मात्** मुक्तिरशक्या?

उत्तरः उचितप्रायश्चित्तं विना **पापात्** मुक्तिरशक्या।

१०. **किं** सर्वथा श्रेयस्करम्?

उत्तर: **सत्कर्मानुसरणं** सर्वथा श्रेयस्करम्।

**ब. उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

१. _______ सागरतीरे _______ एव अवलोकयितुमारब्धवान्।

(सः / बालिका) (स्थातुम् / स्थित्वा)

उत्तर: **सः** सागरतीरे **स्थित्वा** एव अवलोकयितुमारब्धवान्।

२. _______ दृष्टं _______ बाष्पस्यैव मेघो भवति।

(तेन / तम्) (तस्य / तम्)

उत्तर: **तेन** दृष्टं **तस्य** बाष्पस्यैव मेघो भवति।

३. _______ विना पापान्मुक्तिः _______ ।

(उचितप्रायश्चित्ताय / उचितप्रायश्चित्तम्) (अशक्या / शक्या)

उत्तर: **उचितप्रायश्चित्तं** विना पापान्मुक्तिः **अशक्या**।

४. जीवने सदाचारी _______ एव पुण्यसञ्चयं _______ ।

(भूत्वा / भवितुम्) (कर्तुम् / करिष्ये)

उत्तर: जीवने सदाचारी **भूत्वा** एव पुण्यसञ्चयं **करिष्ये**।

**क. कः कं वदति? इति लिखत।**

१. अस्य पापस्य किं करोषि?

उत्तर: **यात्री मेघं वदति।**

२. अहं तु जीवनदाता।

उत्तर: **मेघः यात्रिणं वदति।**

३. यस्य यत्पापमस्ति तत्तस्य गृहशिखरे वृष्टिरूपेण पातयामि।

उत्तर: **मेघः यात्रिणं वदति।**

**ङ. सत्यं वा असत्यं वा तद् लिखत।**

१. जलस्यैव मेघो भवति।

उत्तर: **असत्यम्।**

२. मेघ: जीवनदाता।

उत्तर: **सत्यम्।**

३. गङ्गास्नानं विना पापन्मुक्तिरशक्या।

उत्तर: **असत्यम्।**

४. सत्कर्मानुसरणमेव सर्वथा श्रेयस्करम्।

उत्तर: **सत्यम्।**

५. अस्वस्थमनसा यात्री स्वगृहमगच्छत्।

उत्तर: **असत्यम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. 'सत्कर्मानुसरणं सर्वथा श्रेयस्करम्' इति कल्पनां स्पष्टीकुरुत।

उत्तर: 'सत्कर्म एव पुण्यम्।' या पाठात आयुष्यातील सत्कर्मांचे महत्त्व विशद केले आहे. धार्मिक ठिकाणी नदी किंवा समुद्रात स्नान केल्यामुळे आपली पापे धुतली जातात, अशी आपली श्रद्धा आहे. परंतु खरे तर आपण पापाचे मूळ असणाऱ्या अभिलाषा नष्ट केल्या पाहिजेत. आपण सत्कर्मे करण्याचा ठाम निश्चय केला पाहिजे.

प्रत्येकाला आपल्या कर्माची, वागण्याची फळे मिळतातच, असे ही कथा स्पष्ट करते. जर एखाद्याने पापकर्म केले असेल, तर त्याला याच जन्मात त्याची शिक्षा मिळते व त्याची परतफेड करावी लागते. तीर्थयात्रेला जाऊन, पवित्र नद्यांमध्ये स्नान करून, दानधर्म करून किंवा अन्य कोणत्याच मार्गाने आपण आपले पाप धुऊन टाकू शकत नाही. म्हणूनच आपले पाप धुऊन टाकण्याचा प्रयत्न करण्यापेक्षा आपण मुळातच पाप न करण्याचा प्रयत्न केला पाहिजे. आपण नीतीने वागण्याचा ठाम निश्चय केला पाहिजे आणि पापाचे मूळ असणाऱ्या अभिलाषांचा नाश केला पाहिजे, कारण आपल्याला आपल्या कर्मांचे परिणाम याच जन्मात पुढे येणाऱ्या काळात भोगावे लागतात.

थोडक्यात, पाप कधीही धुऊन टाकता येत नाही आणि कोणीही आपल्या पापकर्मांच्या परिणामांतून मुक्त होऊ शकत नाही. म्हणूनच, नीतीने आणि योग्य तऱ्हेने वागावे. सत्कर्माचा मार्ग हाच सर्वांत उत्तम मार्ग आहे.

## पृथक्करणम्।

१. घटनाक्रमानुसारं वाक्यानि संयोजयत।

i. बाष्पस्य मेघो भवति इति दृष्टम्।

ii. प्रशान्तमनसा स्वगृहं गतम्।

iii. सागरतीरे स्थित्वा अवलोकयितुम् आरब्धम्।

iv. सत्कर्मानुसरणमेव सर्वथा श्रेयस्करमिति ज्ञातम्।

उत्तर: **i. सागरतीरे स्थित्वा अवलोकयितुम् आरब्धम्।**

**ii. बाष्पस्य मेघो भवति इति दृष्टम्।**

**iii. सत्कर्मानुसरणमेव सर्वथा श्रेयस्करमिति ज्ञातम्।**

**iv. प्रशान्तमनसा स्वगृहं गतम्।**

## शब्दज्ञानम्।

**अ. गद्यांशे पर्यायशब्दं चिनुत।**

| | | |
|---|---|---|
| *१. वारिदः, जलदः, पयोदः, घनः | = | **मेघः।** |
| २. उत्सुकः | = | **उत्कण्ठितः।** |
| ३. सागरतटे | = | **सागरतीरे।** |
| ४. द्रष्टुम् , विलोकयितुम् | = | **अवलोकयितुम्।** |
| ५. उक्तवान्, गदितवान् | = | **भणितवान्।** |
| ६. पर्जन्यः, वर्षा | = | **वृष्टिः।** |

ब. गद्यांशे विलोमशब्दं चिनुत।

| | | | |
|---|---|---|---|
| *१. | कदाचित् | × | **पुनःपुनः।** |
| *२. | दुराचारी | × | **सदाचारी।** |
| *३. | अस्वस्थमनसा | × | **प्रशान्तमनसा।** |
| ४. | पुण्याचरणम् | × | **पापाचरणम्।** |

क. **चतुर्थपदं लिखत।**

१. श्रु : श्रुत्वा :: कृ : ______

उत्तरः श्रु : श्रुत्वा :: कृ : **कृत्वा**

२. स्था-तिष्ठ् : स्थित्वा :: भू-भव् : ______

उत्तरः स्था-तिष्ठ् : स्थित्वा :: भू-भव् : **भूत्वा**

३. स्थित्वैव : स्थित्वा+एव :: भूत्वैव : ______

उत्तरः स्थित्वैव : स्थित्वा+एव :: भूत्वैव : **भूत्वा+एव**

४. स्थित्वैव : स्थित्वा+एव :: बाष्पस्यैव : ______

उत्तरः स्थित्वैव : स्थित्वा+एव :: बाष्पस्यैव : **बाष्पस्य+एव**

५. प्रच्छ्-पृच्छ् : पृष्टवान् :: भण् : ______

उत्तरः प्रच्छ्-पृच्छ् : पृष्टवान् :: भण् : **भणितवान्**

६. नि+शम् : निशम्य :: वि+चिन्त् : ______

उत्तरः नि+शम् : निशम्य :: वि+चिन्त् : **विचिन्त्य**

७. कृ : करिष्ये : : दा : ______

उत्तर: कृ : करिष्ये : : दा : **दास्ये**

८. करोषीति : करोषि+इति : : पातयामीति : ______

उत्तर: करोषीति: करोषि+इति : : पातयामीति: **पातयामि+इति**

## ड. भिन्नार्थकशब्दानां ज्ञानम्।

१. योग्यं पर्यायं चिनुत।

**'जीवनम्' इति शब्दस्य अर्थ: जीवितम् (जीवन) जलं (पाणी) च।**

'जीवनं स्वकर्माधिष्ठितम्।' एतस्मिन् वाक्ये जीवनं नाम ______ ।

उत्तर: 'जीवनं स्वकर्माधिष्ठितम्।' एतस्मिन् वाक्ये जीवनं नाम **जीवितम् ।**

## ड़. विशेषण-विशेष्य-अन्विति:।

१. दत्तेषु शब्देषु विशेषण-विशेष्ययुगुलानि चिनुत।

मेघ:, श्रेयस्करम् , उत्कण्ठित:, सत्कर्मानुसरणम् , यात्री, जीवनदाता, स्वकर्माधिष्ठितम् , जीवनम्

| | विशेषणम् | | विशेष्यम् |
|---|---|---|---|
| i. | | ⟷ | |
| ii. | | ⟷ | |
| iii. | | ⟷ | |
| iv. | | ⟷ | |

उत्तर: i. श्रेयस्करम् ⟷ सत्कर्मानुसरणम्।


ii. उत्कण्ठित: ⟷ यात्री।

iii. जीवनदाता ⟷ मेघ:।

iv. स्वकर्माधिष्ठितम् ⟷ जीवनम्।

## फ. धातुसाधित-अव्ययानां चयनम् (त्वान्त / ल्यबन्त / तुमन्त) / विभक्त्यन्तपदानां चयनम्।

१. गद्यांशे आगतानि पूर्वकालवाचक-धातुसाधित-'त्वान्त-' अव्ययानि लिखित्वा जालरेखाचित्रं पूरयत।




**उत्तर:** १. **श्रुत्वा।** २. **स्थित्वा।**
३. **भूत्वा।** ४. **कृत्वा।**

२. गद्यांशे पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये चित्वा लिखत।

**उत्तर: ल्यबन्त-अव्यये-**

i. **निशम्य।**

ii. **विचिन्त्य।**

३. गद्यांशे हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।

**उत्तर: तुमन्त-अव्ययम्-**

i. **अवलोकयितुम्।**

४. I. गद्यांशे षष्ठी-विभक्त्यन्तपदानि चित्वा लिखत।

**उत्तर:** i. **तस्य।**

ii. **बाष्पस्य।**

iii. **अस्य।**

iv. **पापस्य।**

v. **यस्य।**

II. गद्यांशे तृतीया-विभक्त्यन्तपदानि चित्वा लिखत।

**उत्तर:** i. **तेन।**

ii. **वृष्टिरूपेण।**

iii. **प्रशान्तमनसा।**

## ग. समूहेतरपदं चिनुत।

१. श्रुत्वा, भूत्वा, निशम्य, कृत्वा

उत्तर: **निशम्य।**

२. विचिन्त्य, अवलोकयितुम् , निशम्य

उत्तर: **अवलोकयितुम्।**

३. पृष्टवान् , वृष्टिरूपेण, आरब्धवान् , भणितवान्

उत्तर: **वृष्टिरूपेण।**

४. करिष्ये, दास्ये, पातयामि

उत्तर: **पातयामि।**

५. श्रेयस्करम् , उत्कण्ठित:, सदाचारी, प्रशान्तमना:

उत्तर: **श्रेयस्करम्।**

६. अतीव, अधुना, अस्य, अत:

उत्तर: **अस्य।**

७. भवति, अगच्छत् , करोषि, करोमि

उत्तर: **अगच्छत्।**

८. अकरोत् , करिष्ये, अगच्छत्

उत्तर: **करिष्ये।**

# कृतिपत्रिकायाः तृतीयः विभागः - व्याकरणम्।

## सन्धयः।

| | | | |
|---|---|---|---|
| *१. | एतन्निशम्य | = | **एतत् + निशम्य।** |
| *२. | मनस्यकरोत् | = | **मनसि + अकरोत्।** |
| *३. | पापमुक्तो भवति | = | **पापमुक्तः + भवति।** |
| *४. | तस्मिन्नेव | = | **तस्मिन् + एव।** |
| *५. | भवतीति | = | **भवति + इति।** |
| *६. | ज्ञातुमुत्सुकोऽसौ | = | **ज्ञातुम् + उत्सुकः + असौ।** |
| *७. | तच्छुत्वा | = | **तत् + श्रुत्वा।** |
| *८. | पापान्मुक्तिरशक्या | = | **पापात् + मुक्तिः + अशक्या।** |
| *९. | कस्मा अपि | = | **कस्मै + अपि।** |
| १०. | इत्यनेन | = | **इति + अनेन।** |

| | | | |
|---|---|---|---|
| ११. | स्यादिति | = | **स्यात् + इति।** |
| १२. | सर्वमेतत्पापमयम् | = | **सर्वम् + एतत् + पापमयम्।** |
| १३. | जानेऽहमिति | = | **जाने + अहम् + इति।** |
| १४. | पापधिरेव | = | **पापधिः + एव।** |
| १५. | अतीवोत्कण्ठितः | = | **अतीव + उत्कण्ठितः।** |
| १६. | स्थित्वैव | = | **स्थित्वा + एव।** |
| १७. | बाष्पस्यैव | = | **बाष्पस्य + एव।** |
| १८. | तत्तस्य | = | **तत् + तस्य।** |
| १९. | भूत्वैव | = | **भूत्वा + एव।** |
| २०. | स्वगृहमगच्छत् | = | **स्वगृहम् + अगच्छत्।** |

## पदपरिचयः।

### धातवः।

**वर्तमानकालः।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *१. | जाने | ज्ञा | ९ उ.प. येथे प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |
| २. | भवति | भू – भव् | १ प.प. | वर्तमानकालः | तृतीयः | एकवचनम् |
| ३. | करोषि | कृ | ८ उ.प. येथे प.प. | वर्तमानकालः | द्वितीयः | एकवचनम् |
| ४. | वर्तते | वृत् – वर्त् | १ आ.प. | वर्तमानकालः | तृतीयः | एकवचनम् |
| ५. | करोति | कृ | ८ उ.प. येथे प.प. | वर्तमानकालः | तृतीयः | एकवचनम् |
| ६. | मिलामि | मिल् | ६ प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |
| ७. | उत्सृजामि | उद् + सृज् | ६ प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |
| ८. | निक्षिपन्ति | नि + क्षिप् | ६ उ.प. येथे प.प. | वर्तमानकालः | तृतीयः | बहुवचनम् |
| ९. | भवसि | भू-भव् | १ प.प. | वर्तमानकालः | द्वितीयः | एकवचनम् |
| १०. | आनयन्ति | आ + नी → नय् | १ उ.प. येथे प.प. | वर्तमानकालः | तृतीयः | बहुवचनम् |
| ११. | गृह्णामि | ग्रह् | ९ उ.प. येथे प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |
| १२. | करोमि | कृ | ८ उ.प. येथे प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |

**प्रथमभूतकालः।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| १३. | आसीत् | अस् | २ प.प. | प्रथमभूतकालः | तृतीयः | एकवचनम् |
| १४. | अकरोत् | कृ | ८ उ.प. येथे प.प. | प्रथमभूतकालः | तृतीयः | एकवचनम् |
| १५. | अगच्छत् | गम् – गच्छ् | १ प.प. | प्रथमभूतकालः | तृतीयः | एकवचनम् |

**विध्यर्थः।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| १६. | स्यात् | अस् | २ प.प. | विध्यर्थः | तृतीया | एकवचनम् |

### प्रयोजकम्।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | प्रयोजकम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|---|
| *१७. | भावयति | भू-भव् | १ प.प. | प्रयोजकम् | वर्तमानकाल: | तृतीय: | एकवचनम् |
| १८. | पातयामि | पत् | १ प.प. | प्रयोजकम् | वर्तमानकाल: | प्रथम: | एकवचनम् |

### भविष्यत्कालः।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *१९. | दास्ये | ध → यच्छ् दा | १ प.प. आणि 3 उ.प | भविष्यत्काल: | प्रथम: | एकवचनम् |
| *२०. | करिष्ये | कृ | ८ उ.प. येथे आ.प | भविष्यत्काल: | प्रथम: | एकवचनम् |

### परोक्षभूतकालः।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| २१. | जगाम | गम् – गच्छ् | १ प.प. | अभ्यस्त-परोक्षभूतकाल: | तृतीय: | एकवचनम् |

### पूर्वकालवाचक – धातुसाधित – अव्ययानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | पूर्वकालवाचकम् |
|---|---|---|---|---|
| *२२. | निशम्य | नि + शम् → शाम् | ४ प.प. | ल्यबन्त-अव्ययम्। |
| *२३. | प्राप्य | प्र + आप् | ५ प.प. | ल्यबन्त-अव्ययम्। |
| २४. | गत्वा | गम् – गच्छ् | १ प.प. | त्वान्त-अव्ययम्। |
| २५. | श्रुत्वा | श्रु | ५ प.प. | त्वान्त-अव्ययम्। |
| २६. | स्थित्वा | स्था – तिष्ठ् | १ प.प. | त्वान्त-अव्ययम्। |
| २७. | भूत्वा | भू – भव् | १ प.प. | त्वान्त-अव्ययम्। |
| २८. | कृत्वा | कृ | ८ उ.प. | त्वान्त-अव्ययम्। |
| २९. | निमज्य | नि + मस्ज् → मज्ज् | ६ प.प. | ल्यबन्त-अव्ययम्। |
| ३०. | विचिन्त्य | वि + चिन्त् | १० उ.प. | ल्यबन्त-अव्ययम्। |

### हेत्वर्थक – धातुसाधित – अव्ययानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | हेत्वर्थक – धातुसाधितम् |
|---|---|---|---|---|
| *३१. | ज्ञातुम् | ज्ञा | ९ उ.प. | तुमन्त-अव्ययम्। |
| ३२. | अवलोकयितुम् | अव + लोक् | १० उ.प. | तुमन्त-अव्ययम्। |

## च्वि-रूपाणि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| ३३. | बाष्पीभूतस्य | बाष्प + भू → भव् | १ प.प. | कर्मणि-भू -धा-वि. | पुंलिङ्गम् नपुंसकलिङ्गम् | षष्ठी | एकवचनम् |

## कर्मणि – भूतकालवाचक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| ३४. | श्रुतम् | श्रु + शृ | ५ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| ३५. | सङ्कलितम् | सम् + कल् | १० उ.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| ३६. | दृष्टम् | दृश् – पश्य् | १ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| ३७. | ज्ञातम् | ज्ञा | ९ उ.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |

## कर्तरि – भूतकालवाचक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *३८. | चिन्तितवान् | चिन्त् | १० उ.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| *३९. | आरब्धवान् | आ + रभ् | १ आ.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| *४०. | गतवान् | गम् → गच्छ् | १ प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४१. | निमग्ने | नि + मस्ज् → मज्ज् | ६ प.प. अकर्मक धातू | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | सप्तमी | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | द्विवचनम् |
| | | | | | नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |
| ४२. | पृष्टवान् | प्रच्छ् – पृच्छ् | ६ प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४३. | उक्तवती | वच् ब्रू | २ प.प. २ उ.प. | कर्तरि-भू-धा-वि. | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |
| ४४. | उक्तवान् | वच् ब्रू | २ प.प. २ उ.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४५. | भणितवान् | भण् | १ प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |

### वर्तमानकालवाचक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *४६. | अटन् | अट् | १ प.प. | कर्तरि-व-का-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४७. | सति | अस् | २ प.प. | कर्तरि- व-का-धा-वि. | पुंलिङ्गम्, नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |

### नामानि।

| क्र. | रूपम् | प्रातिपदिकम् | प्रकारः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| ४८. | यात्री | यात्रिन् | इन्नन्तम् | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४९. | आत्मानम् | आत्मन् | अन्नन्तम् | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| ५०. | जनानाम् | जन | अकारान्तम् | पुंलिङ्गम् | षष्ठी | बहुवचनम् |
| ५१. | नद्यः | नदी | ईकारान्तम् | स्त्रीलिङ्गम् | प्रथमा, सम्बोधनम् | बहुवचनम् |
| ५२. | जीवनदाता | जीवनदातृ | ऋकारान्तम् | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ५३. | मनसि | मनस् | सकरान्तम् | नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |
| ५४. | सदाचारी | सदाचारिन् | इन्नन्तम् | पुंलिङ्गम् | प्रथमा | एकवचनम् |

### सर्वनामानि।

| क्र. | रूपम् | प्रातिपदिकम् | पुरुषवाचकः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| *५५. | अनेन | इदम् | तृतीयपुरुषः | पुंलिङ्गम् , नपुंसकलिङ्गम् | तृतीया | एकवचनम् |
| *५६. | असौ | अदस् | तृतीयपुरुषः | पुंलिङ्गम् , स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |
| ५७. | अस्मिन् | इदम् | तृतीयपुरुषः | पुंलिङ्गम् , नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |
| ५८. | तेन | तद् | तृतीयपुरुषः | पुंलिङ्गम् , नपुंसकलिङ्गम् | तृतीया | एकवचनम् |
| ५९. | भवत्याः | भवती | तृतीयपुरुषः | स्त्रीलिङ्गम् | पञ्चमी, षष्ठी | एकवचनम् |
| ६०. | अस्य | इदम् | तृतीयपुरुषः | पुंलिङ्गम् , नपुंसकलिङ्गम् | षष्ठी | एकवचनम् |
| ६१. | अहम् | अस्मद् | प्रथमपुरुषः | त्रिषु लिङ्गेषु समानम् | प्रथमा | एकवचनम् |
| ६२. | तस्मिन् | तद् | तृतीयपुरुषः | पुंलिङ्गम् , नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |
| ६३. | सर्वाः | सर्व | तृतीयपुरुषः | स्त्रीलिङ्गम् | प्रथमा | बहुवचनम् |
| ६४. | त्वयि | युष्मद् | द्वितीयपुरुषः | त्रिषु लिङ्गेषु समानम् | सप्तमी | एकवचनम् |
| ६५. | त्वम् | युष्मद् | द्वितीयपुरुषः | त्रिषु लिङ्गेषु समानम् | प्रथमा | एकवचनम् |
| ६६. | यस्य | यद् | तृतीयपुरुषः | पुंलिङ्गम् , नपुंसकलिङ्गम् | षष्ठी | एकवचनम् |
| ६७. | मया | अस्मद् | प्रथमपुरुषः | त्रिषु लिङ्गेषु समानम् | तृतीया | एकवचनम् |
| ६८. | कस्मै | किम् | प्रश्नार्थक सर्वनाम- तृतीयपुरुषः | पुंलिङ्गम् , नपुंसकलिङ्गम् | चतुर्थी | एकवचनम् |

## समासपरिचयः।

### द्वन्द्वः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *1. | अहर्निशम् | अहःच निशा च एतयोः समाहारः। (दिवस व रात्र यांचा समूह) | – | समाहार-द्वन्द्वः। |

**विभक्ति – तत्पुरुषः।**

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *2. | पापमुक्तः | पापात् मुक्तः।<br>(पापांपासून मुक्त) | – | पञ्चमी-तत्पुरुषः। |
| ३. | गङ्गातीरे | गङ्गायाः तीरः।<br>(गंगेचा तीर) | तस्मिन्। | षष्ठी-तत्पुरुषः। |
| ४. | पापक्षालनेन | पापानां क्षालनम्।<br>(पापांचे क्षालन) | तेन। | षष्ठी-तत्पुरुषः। |
| ५. | स्वजलस्थितम् | i. स्वस्य जलम्। स्वजलम्।<br>(स्वतःचे जल)<br>ii. स्वजले स्थितम्।<br>(स्वतःच्या पाण्यात असलेले) | – | षष्ठी-तत्पुरुषः।<br><br>सप्तमी-तत्पुरुषः। |
| ६. | पापाकरः | पापानाम् आकरः।<br>(पापांचा साठा) | – | षष्ठी-तत्पुरुषः। |
| ७. | सूर्यकिरणैः | सूर्यस्य किरणाः।<br>(सूर्याचे किरण) | तैः। | षष्ठी-तत्पुरुषः। |
| ८. | जीवनदाता | जीवनस्य दाता।<br>(जीवनाचा दाता) | – | षष्ठी-तत्पुरुषः। |
| ९. | स्वकर्माधिष्ठितम् | i. स्वस्य कर्माणि। स्वकर्माणि।<br>(स्वतःची कर्म) | – | षष्ठी-तत्पुरुषः। |

| | | | | |
|---|---|---|---|---|
| | | ii. स्वकर्मसु अधिष्ठितम्।<br>(स्वकर्मांवर आधारलेले) | | सप्तमी-तत्पुरुषः। |
| १०. | गृहशिखरे | गृहस्य शिखरम्।<br>(घराच्या शिखरावर) | तस्मिन्। | षष्ठी-तत्पुरुषः। |
| ११. | पुण्यसञ्चयम् | पुण्यानां सञ्चयः।<br>(पुण्याचा संचय) | तम्। | षष्ठी-तत्पुरुषः। |

**कर्मधारयः।**

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *१२. | प्रशान्तमनसा | प्रशान्तं मनः।<br>(प्रशांत मन) | तेन। | विशेषण-पूर्वपद-कर्मधारयः। |
| १३. | उचितप्रायश्चित्तम् | उचितं प्रायश्चित्तम्।<br>(योग्य प्रायश्चित) | – | विशेषण-पूर्वपद-कर्मधारयः। |
| १४. | काशीनगरम् | काशी नाम नगरः।<br>(काशी नावाचे नगर) | तम्। | विशेषनाम-सामान्यनाम-कर्मधारयः। |
| १५. | गङ्गानदीम् | गङ्गा नाम नदी।<br>(गंगा नावाची नदी) | ताम्। | विशेषनाम-सामान्यनाम-कर्मधारयः। |
| १६. | पापाचरणम् | पापयुक्तम् आचरणम्।<br>(पापयुक्त आचरण) | – | मध्यमपदलोपी-कर्मधारयः। |

**बहुव्रीहिः।**

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| १७. | साशङ्कमनाः | साशङ्कं मनः यस्य सः।<br>(ज्याचे मन साशंक आहे असा) | – | बहुव्रीहिः। |
| १८. | साशङ्कम् | शङ्कया सहितं यथा स्यात् तथा।<br>(शंकेने सहित) | – | क्रियाविशेषण-सहबहुव्रीहिः। |